527

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

# शाक्तप्रमोदान्तर्गतं

षोडशं

# सूर्यतन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीखुराज-

दुबेजीद्वारा संशोधितम् ।

---

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" ( स्टीम् ) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

---

तृतीयावृत्तिः ।

---

अस्य ग्रन्थस्य पुनर्मुद्रणाद्यधिकाराः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

अनुयोगसूत्र [illegible]

श्रीगणेशाय नमः !

# अथ सूर्य्यतन्त्रम् ।

## अथश्रीसूर्य्यध्यानम् ।


भास्वद्रत्नाढ्यमौलिःस्फुरदधररुचारञ्जितश्चारुकेशोभास्वान्योदिव्यतेजा ×करकमलयुतःस्वर्णवर्णं ×प्रभाभिः ॥ विश्वाकाशावकाशोग्रहगणसहितोभातियश्चोदयाद्रौसर्व्वानन्दप्रदाताहरिहरनामित ×पातुमाँव्विश्वचक्षुः ॥ १ ॥



## अथयन्त्रोद्धारः ।

पूर्वमष्टदलम्पद्मम्प्रणवादिप्रतिष्ठितम् ॥ मायावीजन्दलाष्टाग्रेयन्त्रमुद्धारयेदिति ॥ आदित्यम्भास्करम्भानुंरविंसूर्य्यन्दिवाकरम् ॥ मार्त्तण्डन्तपनञ्चेतिदलेष्वष्टसुयोजयेत् ॥ दीप्तासूक्ष्मा

जयाभद्राविभतिर्व्विमलातथा ॥ अमोघाविद्युताचेतिमध्येश्रीःसर्व्वतोमुखी ॥



## अथमन्त्रोद्धारः ।

तारोघृणिर्भृगुःपश्चाद्वामकर्ण्णविभूषितः ॥ वह्नयासनोमरुच्छेषःसनेत्रोदित्यपश्चिमः ॥ अष्टाक्षरोमनुरयंप्रोक्तोभानोरभिमतःपरः ॥

## अथमन्त्रः ।

ॐघृणिःसूर्य्यआदित्यः ।

## अथपूजाविधिः ।

प्रातःकृत्यादिप्राणायामान्तँव्विधायपीठन्यासङ्कुर्य्यात ॥ तत्रविशेषः ॥ हृदयस्यपूर्व्वादिदिक्षुमध्येचप्रभूतँव्विमलंसारंसमाराध्यम्परमसुखँव्विन्यस्याधारशक्त्यादिअंसूर्य्यमण्डलायदशकलात्मनेनमः इत्यन्तँव्विन्यसेत् ॥ तथाचनिवन्धे ॥ पीठेचक्कृते

प्रथमन्दिक्षुमध्येचसय्यँजेत् ॥प्रभूतँविमलंसारंसमाराध्यमनन्तरम् ॥ परमादिसुखम्पीठंस्वबिम्बान्तम्प्रकल्पयेत् ॥ ततश्केसरेषुमध्येच॥रांदीप्तायैनमः॥एवंरींसूक्ष्मायै० रूंजयायै०रैंभद्रायै० वैंविभूत्यै०वोंविमलायै० वौंअमोघायै० रंविद्युतायै०रःसर्व्वतोमुख्यै० ॥ तथाचनिबन्धे ॥ दीप्तासूक्ष्माजयाभद्राविभूतिर्व्विमलापुनः ॥ अमोघाविद्युतासर्व्वतोमुखीपीठशक्तयः ॥ दीप्तदीपशिखाकाराबीजान्यासाँव्विदुःक्रमात् ॥ अङ्कीवह्नस्त्रितयस्वरान् बिन्द्वग्निसय्युतान् ॥ ॐतदुपरिब्रह्मविष्णुशिवात्मकायसौराय योगपीठायनमः ॥ तथाचशारदायाम् ॥ वदेत्पदञ्चतुर्थ्यन्तम्ब्रह्म विष्णुशिवात्मकम् ॥ सौरायय्योगपीठायनमश्पदमनन्तरम् ॥ पीठमन्त्रोऽयमाख्यातोदिनेशस्यजगत्पतेः ॥ ततश्ऋष्यादिन्यासः ॥ शिरसिदेवभागऋषयेनमः॥ मुखेगायत्रीछन्दसेनमः॥हृदि आदित्यायदेवतायैनमः ॥ तथाचनिबन्धे ॥ देवभागोमुनिश्प्रोक्तोगायत्रीछन्दईरितम्॥आदित्योदेवताप्रोक्तादृष्टादृष्टफलप्रदा ॥ ततश्कराङ्गन्यासौ ॥ सत्यायतेजोज्वालामणेहुंफट्स्वाहा अङ्गुष्ठाभ्यान्नमः॥ एवंब्रह्मणेतेजोज्वालामणे० १०तर्ज्जनीभ्यांस्वाहा। विष्णवेते० १० मध्यमाभ्याव्वँषट् । रुद्रायते० १० अनामिकाभ्यांहूम् । अग्नयेते० १० कनिष्ठाभ्याव्वौषट् । सर्व्वायते० १० करतलकरपृष्ठाभ्यांफट् ॥ एवंहृदयादिषु ॥ तथाचशारदायाम् ॥ सत्यायहृदयम्प्रोक्तम्ब्रह्मणेशिरईरितम् ॥ विष्णवेस्याच्छिखावर्म्मरुद्रायपरिकीर्त्तितम् ॥ अग्नयेनेत्रमाख्यातं सर्व्वायास्त्रमुदाहृतम् ॥ तेजोज्वालामणेहूंफट्द्विठान्ताश्पपरिकीर्त्तिताः॥ ततोमूर्त्तिन्यासः ॥यथा॥ ॐशिरसिआदित्यायनमः॥ एवंमुखेएँरवये०हृदयेउँभानवे०गुह्येइँभास्कराय०चरणयोः अँसूर्य्याय०॥तथाचनिबन्धे॥आदित्यँव्विन्यसेन्मूर्ध्निरविम्मुखग

तन्यसेत् ॥ हृदयेभानुनामानम्भास्करङ्कुक्षिदेशतः॥ सूर्य्यश्चरण योर्न्यस्यवर्णैःसत्यादिपञ्चभिः ॥ ततोन्यासः ॥ शिरसिॐनमः आस्येॐघृनमः कण्ठेॐणिनमः हृदिॐसूनमः कुक्षौॐर्य्यनमः नाभौॐआनमः लिङ्गेॐदिनमःपादयोःॐत्यनमः॥तथाचॐमू र्द्धास्यकण्ठहृदयकुक्षिनाभिध्वजाङ्घ्रिषु ॥मन्त्रवर्णान्न्यसेदष्टौ प्रत्येकम्प्रणवादिकम्॥ततोध्यानम् ॥ रक्ताब्जयुग्माभयदानहस्त ङ्केयूरहाराङ्गदकुण्डलाढ्यम्॥माणिक्यमौलिन्दिननाथमीडेबन्धू ककान्तिम्बिलसत्त्रिनेत्रम् ॥एवन्ध्यात्वामानसैःसम्पूज्यकुम्भस्था पनङ्कुर्य्यात् ॥ ततोगुरुपङ्क्तिपूजाङ्कृत्वा पीठपूजाङ्कुर्य्यात् ॥ ॐखंखखोल्कायनमः इतिमन्त्रेणमूर्त्तिसङ्कल्प्यपुनर्द्ध्यात्वाऽऽवा हनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तँव्विधायाऽऽवरणपूजामारभेत्॥ तथाचनिबन्धे ॥ तारादिखंखखोल्कायमनुनामूर्त्तिकल्पना ॥ साक्षिणंसर्व्वलोकानान्तस्यामावाह्यपूजयेत् ॥ केसरेष्वग्न्यादि कोणेमध्येदिक्षुचसत्यायते जोज्वालामणिहुँफट्स्वाहाहृदयायन मः एवंब्रह्मणे० १० शिरसेस्वाहा। विष्णवे० १० शिखायैवषट्। रुद्राय० १०कवचायहूम् । अग्नये० १०नेत्रत्रयायवौषट् । सर्व्वा य० १० अस्त्रायफट्॥दिक्पत्रेषुपूर्व्वादिॐआदित्यायनमः एवंएँ रवये०उँभानवे० ईभास्कराय० विदिक्पत्रेषुअग्न्यादिऊँउषायै० एवंप्रं प्रज्ञायै०पम्प्रभायै० सँसन्ध्यायै० ॥तथाच॥अङ्गानिपूजये दादौदिक्पत्रेसूर्य्यमूर्त्तयः ॥ आदित्याद्याश्चतस्रोऽर्च्च्याःशक्तय. कोणपत्रगाः॥ स्वस्वनामादिवर्णाःस्युस्तासाम्बीजान्यनुक्रमात् उषाप्रज्ञाप्रभासन्ध्याःशक्तयश्परिकीर्त्तिताः ॥ ततश्पत्रेषुब्रा ह्याद्याःपूरतोऽरुणमर्च्चयेत् ॥ तथाचशारदायाम् ॥ पत्राग्र संस्थाब्राह्याद्याःपुरतोऽरुणमर्च्चयेदिति ॥ तद्बाह्येपूर्व्वादिचन्द्रा दीन्पूजयेत् ॥ ॐ चन्द्रायनमः ॐमङ्गलायनमः एवंबुधाय०

बृहस्पतये० शुक्राय० शनैश्चराय० राहवे० केतवेनमः॥ तथाच शारदायाम्॥ चन्द्रादीन्वह्नयादींश्चसम्पूज्यधूपादिविसर्ज्जनान्तङ्कर्म्मसमापयेत्॥ अस्यपुरश्चरणमष्टलक्षजपः॥ तथाच॥ वसुलक्षञ्जपेन्मन्त्रमाज्येनचदशांशतः॥ तिलैर्व्वामधुरासिक्तैर्जुहुयाद्विजितेन्द्रियः॥

इति पूजा।

## अथ स्तोत्रम्।

वसिष्ठउवाच॥ स्तुवंस्तत्रततःसाम्बꣳकृशोधमनिसन्ततः॥ राजन्नामसहस्रेण सहस्रांशुन्दिवाकरम्॥ विद्यमानन्तुतन्दृष्ट्वासूर्य्यꣳकृष्णात्मजन्तदा॥स्वप्रेतुदर्शनन्दत्वापुनर्व्वचनमब्रवीत्॥ श्रीसूर्य्यउवाच॥ साम्बसाम्बमहाबाहोशृणुजाम्बवतीसुत॥ अलन्नामसहस्रेणपठस्वेमंस्तवंशुभम्॥ यानिनामानिगुह्यानिपवित्राणिशुभानिच॥ तानितेकीर्त्तयिष्यामिश्रुत्वावत्सावधारय॥ विकर्त्तनोविवस्वांश्चमार्त्तण्डोभास्करोरविः॥ लोकप्रकाशकःश्रीमाँल्लोकचक्षुर्ग्रहेश्वरः॥ लोकसाक्षीत्रिलोकेशःकर्त्ताहर्त्तातमिस्रहा॥ तपनस्तापनश्चैवशुचिःसप्ताश्ववाहनः॥ गभस्तिहस्तोब्रह्मा चसर्व्वदेवनमस्कृतः॥ एकविंशतिरित्येषस्तवइष्टःसदामम॥ श्रीरारोग्यकरश्चैवधनवृद्धियशस्करः॥ स्तवराजइतिख्यातस्त्रिषुलोकेषुविश्रुतः॥ यएतेनमहाबाहोद्वेसन्ध्येस्तवनोदये॥ स्तौतिमांप्रणतोभूत्वासर्व्वपापैꣳप्रमुच्यते॥ कायिकञ्चवाचिकञ्चैवमानसञ्यच्चदुष्कृतम्॥ एषजाप्येनतत्सर्व्वम्प्रणश्यतिनसंशयः॥एषजप्यश्चहोमश्चसन्ध्योपासनमेवच॥ बलिमन्त्रोऽर्घ्यमन्त्रश्चधूपमन्त्रस्तथैवच॥ अन्नप्रदानेस्नानेच प्रणिपातेप्रदक्षिणे॥ पूजितोयम्महामन्त्रः सर्व्वपापहरःशुभः॥ एवमुक्तातुभगवान्भा

स्करोजगदीश्वरः ॥ आमन्त्र्यकृष्णतनयन्तत्रैवान्तरधीयत ॥ साम्बोऽपिस्तवराजेनस्तुत्वासप्ताश्ववाहनम् ॥ पूतात्मानीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥ ॥ इतिसाम्बपुराणेसूर्य्य स्तवःसम्पूर्णः ॥

## अथ कवचम् ।

श्रीसूर्य्यउवाच ॥ साम्बसाम्बमहाबाहोशृणुमेकवचंशुभम् ॥ त्रैलोक्यमङ्गलन्नामकवचम्परमाद्भुतम् ॥ यज्ज्ञात्वामन्त्रवित्सम्य क्फलमाप्नोतिनिश्चितम् ॥ यद्धृत्वाचमहादेवोगणानामधिपोभव त् ॥ पठनाद्धारणाद्विष्णुःसर्व्वेषाम्पालकःसदा ॥ एवमिन्द्रादयः सर्व्वेसर्व्वैश्वर्य्यमवाप्नुयुः ॥ कवचस्यऋषिर्ब्रह्माछन्दोनुष्टुबुदाहृ तम् ॥ श्रीसूर्य्यो देवताचात्रसर्व्वदेवनमस्कृतः ॥ आरोग्ययशोमो क्षेषुविनियोगःप्रकीर्त्तितः ॥ प्रणवोमेशिरःपातुघृणिर्म्मेपातुभा लकम् ॥ सूर्य्योव्यान्नयनद्वन्द्वमादित्यःकर्ण्णयुग्मकम् ॥ अष्टा क्षरोमहामन्त्रःसर्व्वाभीष्टफलप्रदः ॥ह्रींबीजम्मेमुखम्पातुहृदयम्भु वनेश्वरी॥ चन्द्रबीजँवित्सगर्गांढयम्पातुमेगुह्यदेशकम् ॥ अक्षरोऽ सौमहामन्त्रः सर्व्वतन्त्रेषुगोपितः ॥ शिवोवह्निसमायुक्तोवामा क्षिम्बिन्दुभूषितः॥एकाक्षरोमहामन्त्रःश्रीसूर्य्यस्यप्रकीर्त्तितः ॥ गु ह्याद्गुह्यतरोमन्त्रोवाञ्छाचिन्तामणिःस्मृतः ॥ शीर्ष्णादिपादपर्य्य न्तंसदापातुमनूत्तमः॥इतितेकथितान्दिव्यन्त्रिषुलोकेषुदुर्ल्लभम् ॥ श्रीप्रदङ्कान्तिदन्नित्यन्धनारोग्यविवर्द्धनम् ॥ कुष्ठादिरोगशमन म्महाव्याधिविनाशनम् ॥ त्रिसन्ध्यंयःपठेन्नित्यमरोगीबलवा न्भवेत् ॥ बहुनाकिमिहोक्तेनयद्यन्मनसिवर्त्तते ॥ तत्तत्सर्व्वम्भव त्येव कवचस्यचधारणात् ॥ भूतप्रेतपिशाचाश्चयक्षगन्धर्व्वरा क्षसाः ॥ ब्रह्मराक्षसवेतालानैवद्रष्टुमपिक्षमाः ॥ दूरादेवपलाय न्तेतस्यसङ्कीर्त्तनादपि ॥ भूर्ज्जपत्रेसमालिख्यरोचनागुरुकुङ्कुमैः॥

रविवारेचसङ्क्रान्त्यांसप्तम्याञ्चविशेषतः ॥ धारयेत्साधकश्रेष्ठ स्त्रैलोक्यविजयीभवेत् ॥ त्रिलोहमध्यगङ्कृत्वाधारयेद्दक्षिणेभुजे॥ शिखायामथवाकण्ठेसोऽपिसूर्य्योनसंशयः ॥ इतितेकथितंसाम्ब त्रैलोक्यमङ्गलाभिधम् ॥ कवचन्दुर्ल्लभँल्लोकेतवस्नेहात्प्रकाशित म् ॥ अज्ञात्वाकवचन्दिव्यय्यँयोजपेत्सूर्य्यमुत्तमम् ॥ सिद्धिर्न्न जायतेतस्यकल्पकोटिशतैरपि ॥ १८ ॥ इतिब्रह्मयामलेत्रैलोक्य मङ्गलनामश्रीसूर्य्यकवचंसम्पूर्णम् ॥

## अथहृदयम्।

ततोयुद्धपरिश्रान्तंसमरेचिन्तयास्थितम्॥ रावणञ्चाग्रतोदृष्ट्वा युद्धायसमुपस्थितम् ॥ १ ॥ दैवतैश्चसमागम्यद्रष्टुमभ्यागतोरण म् ॥ उपगम्याब्रवीद्रामममगस्त्योभगवांस्तदा ॥ २ ॥ राममराम महाबाहोशृणुगुह्यंसनातनम् ॥ येनसर्व्वानरीन्वत्ससमरेविजयि ष्यसे ॥३॥ आदित्यहृदयम्पुण्यंसर्व्वशत्रुविनाशनम् ॥ जयावह ञ्चपन्नित्यमक्षयम्परमंशिवम् ॥४॥ सर्व्वमङ्गलमाङ्गल्यंसर्व्वपाप प्रणाशनम् ॥ चिन्ताशोकप्रशमनमायुर्व्वर्द्धनमुत्तमम् ॥ ५ ॥ रश्मिमन्तंसमुद्यन्तन्देवासुरनमस्कृतम् ॥पूजयस्वविवस्वन्तम्भा स्करम्भुवनेश्वरम् ॥६॥सर्व्वदेवात्मकोह्येषतेजस्वीरश्मिभावनः॥ एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥ ७ ॥ एषब्रह्मा चविष्णुश्चशिवःस्कन्दःप्रजापतिः॥महेन्द्रोधनदःकालोयमःसो मोह्यपाम्पतिः ॥ ८ ॥ पितरोवसवःसाध्याअश्विनौमरुतोमनुः॥ वायुर्व्वह्निःप्रजाःप्राणऋतुकर्त्ताप्रभाकरः ॥ ९ ॥ आदित्यःस वितासूर्य्यःखगःपूषागभस्तिमान्॥ सुवर्णसदृशोभानुर्हिरण्यरे तादिवाकरः ॥ १० ॥ हरिदश्वःसहस्रार्च्चिःसप्तसप्तिर्म्मरीचि मान्॥ तिमिरोन्मथनःशम्भुस्त्वष्टामार्त्तण्डकोंऽशुमान् ॥११॥

हिरण्यगर्भःशिशिरस्तपनोऽहस्करोरविः ॥ अग्निगर्भोदितेःपुत्रःशङ्खःशिशिरनाशनः ॥ १२ ॥ व्योमनाथस्तमोभेदीऋग्यजुस्सामपारगः॥घनवृष्टिरपाम्मित्रोविन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥ आतपीमण्डलीमृत्युःपिङ्गलःसर्व्वतापनः ॥ कविर्व्विश्वोमहातेजारक्तःसर्व्वभवोद्भवः ॥ १४ ॥ नक्षत्रग्रहताराणामधिपोविश्वभावनः ॥ तेजसामपितेजस्वीद्वादशात्मन्नमोस्तुते ॥ १५ ॥ नमःपूर्व्वायगिरये पश्चिमायाद्रयेनमः ॥ ज्योतिर्ग्गणानाम्पतये दिनाधिपतयेनमः ॥ १६ ॥ जयायजयभद्रायहर्य्यश्वाय नमोनमः ॥ नमोनमः सहस्रांशोआदित्यायनमोनमः ॥ १७ ॥ नमउग्रायवीरायसारङ्गायनमोनमः ॥ नमःपद्मप्रबोधायप्रचण्डायनमोऽस्तुते ॥ १८ ॥ ब्रह्मेशानाच्युतेशायसूरायादित्यवर्च्चसे ॥ भास्वतेसर्व्वभक्षायरौद्रायवपुषेनमः ॥ १९ ॥ तमोघ्नायहिमघ्नायशत्रुघ्नायामितात्मने ॥ कृतघ्नघ्नायदेवायज्योतिषाम्पतयेनमः ॥ २० ॥ तप्तचामीकराभायहरयेविश्वकर्म्मणे ॥ नमस्तमोभिनिघ्नायरुचयेलोकसाक्षिणे ॥ २१ ॥ नाशयत्येष वैभूतन्तमेवसृजतिप्रभुः ॥ पायत्येषतपत्येषवर्ष्पत्येषगभस्तिभिः ॥ २२ ॥ एषसुप्तेषुजागर्त्तिभूतेषुपरिनिष्ठितः ॥ एषचैवाग्निहोत्रञ्चफलञ्चैवाग्निहोत्रिणाम् ॥ २३ ॥ देवाश्चक्रतवश्चैवक्रतूनाम्फलमेवच ॥ यानिकृत्यानिलोकेषुसर्व्वेषुपरमप्रभुः ॥ २४ ॥ एनमापत्सुकृच्छ्रेषुकान्तारेषुभयेषुच ॥ कीर्त्तयन्पुरुषःकश्चिन्नावसीदतिराघव ॥ २५ ॥ पूजयस्वैनमेकाग्रोदेवदेवञ्जगत्पतिम् ॥ एतत्त्रिगुणितञ्जप्त्वायुद्धेषुविजयिष्यसे ॥ २६ ॥ अस्मिन्क्षणेमहाबाहोरावणन्त्वञ्जयिष्यसि ॥ एवमुक्काततोऽगस्त्योजगामसयथागतम् ॥ २७ ॥ एतच्छ्रुत्वामहातेजानष्टशोकोभवत्तदा ॥ धारयामाससुप्रीतोराघवःप्रयतात्मवान् ॥ २८ ॥ आदित्यव्वँी

क्ष्यजप्त्वेदम्परंहृष्टमवाप्तवान्॥ त्रिराचम्यशुचिर्भूत्वाधनुरादा यवीर्य्यवान्॥२९॥ रावणम्प्रेक्ष्यहृष्टात्माजयार्थंसमुपागतम्॥ सर्व्वयत्नेनमहतावृतस्तस्यवधेभवत्॥३०॥ अथरविरवदन्नि रीक्ष्यरामम्मुदितमनाःपरमम्प्रहृष्यमाणः॥ निशिचरपतिसङ्क्ष यँविदित्वासुरगणमध्यगतोवचस्त्वरेति॥३१॥ इतिवाल्मीकी येश्रीमद्रामायणेआदित्यहृदयस्तोत्रंसम्पूर्णम्॥

## अथसूक्तम्।

व्विभ्राड्बृहत्पिवतु सोम्यंमद्धायुर्द्दधद्यज्ञपतावविहुतम्॥ वातजूतोयोऽअभिरक्षतित्मना प्रजाःपुपोषपुरुधाविराजति॥ ॥१॥ उदुत्यञ्जातवेदसन्देवव्वँहन्तिकेतवः॥ दृशेविश्वायसूर्य्य म्॥२॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२॥ऽअनु॥त्वव्वँरुणप श्यसि॥३॥ दैव्यावद्धर्य्यूऽआगतर्ठ्स्थेनसूर्य्यत्वचा॥ म द्धायज्ञर्ठ्समञ्जाथे॥४॥ तम्प्रत्नथापूर्व्वथाविश्श्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदँस्वर्व्विदम्॥ प्रतीचीनँव्वृजनन्दोहसेधु निमाशुञ्जयन्तमनुयासुवर्द्धसे॥५॥ अयँव्वेनश्चोदयत्पृश्निगर्भाज्योतिर्ज्जरायूरजसोविमाने॥ इममपाᳬसङ्गमेसूर्य्यस्यशिशु न्नविग्रामतिभीरिहन्ति॥६॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मि त्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीऽअन्तरिक्षर्ठ्सूर्य्यऽआ त्माजगतस्तस्थुपश्च॥७॥ आनऽइडाभिर्व्विदथेसुशस्तिव्वि श्वानरःसवितादेवऽएतु॥ अपियथायुवानोमत्सथानोविश्वञ्ज गदभिपित्त्वेमनीषा॥८॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य॥स र्व्वन्तदिन्द्रतेव्वशे॥९॥ तरणिर्व्विश्वदर्शतोज्योतिष्कृदसिसू र्य्य॥व्विश्वमाभासिरोचनम्॥१०॥तत्सूर्य्यस्यदेवत्त्वन्तन्महित्व म्मद्ध्याकर्त्तोर्व्वितर्ठ्सञ्जभार॥ यदेदयुक्तहरितःसधस्थादा

द्रात्रीव्वासस्तनुतेसिमस्म्मै ॥ ११ ॥ तन्मित्रस्यव्वरुणस्याभि चक्षेसूर्य्योरूपङ्कृणुते द्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ १२ ॥ बण्महाँ २ ॥ऽअसिसूर्य्य बडादित्यमहाँ २॥ऽअसि ॥ महस्तेसतोमहिमापनस्यतेऽद्धादेव महाँ २॥ऽअसि ॥ १३ ॥ बट्सूर्य्यश्रवसामहाँ २॥ऽअसिसत्रादेवमहाँ २ ॥ ऽअसि ॥ मह्नादेवानामसुर्य्यःपुरोहितो व्विभुज्योतिरदाभ्यम् ॥ १४ ॥ श्रायन्तऽइवसूर्य्यंव्विश्वेदिन्द्रस्यभक्षत ॥ व्वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ॥ १५ ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरंहसःपिपृता निरवद्यात् ॥ तन्नोमित्रोव्वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ॥ १६ ॥ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयाति भुवनानि पश्यन् ॥ १७ ॥ इतिसूक्तम् ॥ ॥

## अथशतनाम ।

धौम्यउवाच ॥ सूर्य्योऽर्य्यमाभगस्त्वष्टा पूषार्कः सवितारविः ॥ गभस्तिमानजःकालो मृत्युर्द्धाताप्रभाकरः ॥ १ ॥ पृथिव्यापश्चतेजश्चखव्वँायुश्चपरायणम् ॥ सोमोबृहस्पतिःशुक्रोबुधोङ्गारकएवच ॥ २ ॥ इन्द्रोविवस्वान्दीप्तांशुः शुचिःशौरिः शनैश्चरः ॥ ब्रह्माविष्णुश्चरुद्रश्चस्कन्दोवैवरुणोयमः ॥ ३ ॥ वैद्युतोजाठरश्चाग्निरैन्धनस्तेजसाम्पतिः ॥ धर्म्मध्वजोवेदकर्त्तावेदाङ्गोवेदवाहनः ॥४॥ कृतन्त्रेताद्वापरश्चकलिःसर्व्वमलाश्रयः ॥ कलाकाष्ठामुहूर्त्तश्चक्षपायामस्तथाक्षणः ॥ ५ ॥ सँव्वत्सरकरोश्वत्थःकालचक्रोविभावसुः ॥ पुरुषःशाश्वतो योगीव्यक्ताव्यक्तः सनातनः ॥ ६ ॥ कालाध्यक्षःप्रजाध्यक्षो विश्वकर्म्मातमो

नुदः ॥ वरुणःसागरोंशश्चजीमूतोजीवनोऽरिहा ॥ ७ ॥ भूताश्रयोभूतपतिः सर्व्वलोकनमस्कृतः ॥ स्रष्टासर्व्वर्त्तकोवह्निः सर्व्वस्यादिरलोलुपः ॥८ ॥ अनन्तश्चकपिलोभानुश्चकामदःसर्व्वतोमुखः ॥ जयोविशालोवरदःसर्व्वधातुनिषेवितः ॥ ९ ॥ मनःसुपर्णोंभूतादिःशीघ्रगःप्राणधारणः ॥ धन्वन्तरिर्द्धूम्रकेतुरादिदेवोदितेःसुतः ॥ १० ॥ द्वादशात्मारविन्दाक्षश्चपितामातापितामहः॥प्रजाद्वारंसर्ग्गद्वारम्मोक्षद्वारन्त्रिविष्टपम्॥११॥दाहकर्त्तांप्रशान्तात्मा विश्वात्माविश्वतोमुखः ॥ चराचरात्मासूक्ष्मात्मा मैत्रेयश्चकरुणान्वितः ॥ १२ ॥ एकद्वैकीर्त्तनीयस्यसूर्य्यस्यामिततेजसः ॥ नामाष्टशतकञ्चेदम्प्रोक्तमेतत्स्वयम्भुवा ॥ १३ ॥ सुरगणपितृयक्षसेवितंह्यसुरनिशाचरसिद्धवन्दितम् ॥ वरकनकहुताशनप्रभम्प्रणिपतितोस्मिहिताय भास्करम् ॥१४॥ सूर्य्योदयेयः सुसमाहितश्चपठेत् सपुत्रदारान् धनरत्नसञ्चयान् ॥ लभेतजातिस्मरतान्तरःसदाधृतिञ्चमेधाञ्चसविन्दतेपुमान् ॥ १५ ॥ इमंस्तवन्देववरस्ययोनरश्चप्रकीर्त्तयेच्छुद्धमनाःसमाहितः ॥ विमुच्यतेशोकदवाग्निसागराल्लभेतकामान्मनसायथेप्सितान् ॥ १६ ॥ इतिश्रीमहाभारतेवनपर्व्वणिधौम्ययुधिष्ठिरसञ्वादे श्रीसूर्य्यस्याष्टोत्तरशतनामस्तोत्रंसमाप्तम् ॥ छ ॥

## अथसहस्रनाम।

सुमन्तुरुवाच ॥ माघेमासि सितेपक्षे सप्तम्याङ्कुरुनन्दन ॥ निराहारोरविम्भक्त्या पूजयेद्विधिनानृप ॥ १ ॥ पूर्व्वोक्तेनजपेज्जप्यन्देवस्यपुरतःस्थितः ॥ शुद्धैकाग्रमनाराजञ्जितक्रोधोजितेन्द्रियः ॥ २ ॥ शतानीकउवाच ॥ केनमन्त्रेणजप्तेनदर्शनम्भगवान्व्रजेत् ॥ स्तोत्रेणवापिसविता तन्मेकथयसुव्रत ॥ ३ ॥

सुमन्तुरुवाच ॥ स्तुतोनामसहस्रेण यदाभक्तिमतामया ॥ त दामेदर्शनय्यँातःसाक्षादेवो दिवाकरः ॥ ४ ॥ शतानीकउवाच ॥ नाम्नांसहस्रंसवितुःश्रोतुमिच्छामितेद्विज ॥ येनतेदर्शनय्यँातः साक्षादेवोदिवाकरः ॥ ५ ॥ सुमन्तुरुवाच ॥ सर्व्वमङ्गलमाङ्ग ल्यं सर्व्वपापप्रणाशनम् ॥ नचेदस्तिभयङ्किञ्चिद्यजनेनचशाम्य ति ॥ ६ ॥ ज्वराद्विमुच्यतेराजन् स्तोत्रेऽस्मिन्पठितेनरः ॥ अ न्येचरोगाश्शाम्यन्ति पठतःशृण्वतस्तथा ॥ ७ ॥ सम्पद्यन्ते यथाकामास्सर्व्वभोगायथेप्सिताः ॥ यएतदादितः श्रुत्वासङ्ग्राम म्प्राविशेन्नरः ॥ ८ ॥ सजित्वासमरेशत्रूनभ्येतिगृहमक्षतः ॥ व न्ध्यानाम्पुत्रजननम्भीतानाम्भयनाशनम् ॥ ९ ॥ भूतिकारि दरिद्राणाङ्कुष्ठिनाम्परमौषधम् ॥ बालानाञ्चैवसर्व्वेषाङ्ग्रहरक्षोनि वारणम् ॥ १० ॥ पठेदेताद्धियोराजन् सश्रेयऽपरमाप्नुयात् ॥ ससिद्धस्सर्व्वसङ्कल्पः सुखमत्यन्तमश्नुते ॥ ११ ॥ धर्म्मार्त्थि भिर्द्धर्म्मलब्ध्यैसुखायचसुखार्त्थिभिः ॥ राज्यायराज्यकामैश्चप ठितव्यमिदन्नरैः ॥ १२ ॥ विद्यावहन्तुविप्राणां क्षत्रियाणाञ्जया वहम् ॥ पश्वावहन्तुवैश्यानां शूद्राणान्धर्म्मवर्द्धनम् ॥ १३ ॥ पठतांशृण्वतामेतद्भवतीतिनसंशयः ॥ तच्छृणुष्वनृपश्रेष्ठ प्रय तात्माब्रवीमिते ॥ १४ ॥ नाम्नांसहस्रँव्विख्यातन्देवदेवस्यभा स्वतः ॥ ॐअस्यश्रीसूर्य्यसहस्रनाम्नाम्भगवान् पराशरऋषिरनु ष्टुप्छन्दःश्रीसूर्य्योदेवतासकलाभीष्टसिद्धचर्त्थेजपेविनियोगः ॥ ॐविश्वविद्विश्वजित्कर्त्ता विश्वात्मा विश्वतोमुखः ॥ विश्वेश्वरो विश्वयोनिर्न्नियतात्माजितेन्द्रियः ॥ १ ॥ कालाश्रयःकालक र्त्ता कालहाकालनाशनः ॥ महायोगीमहाबुद्धिर्म्महात्मासुमहा बलः ॥ २ ॥ प्रभुर्व्विभुर्भूतनाथोभूतात्माभुवनेश्वरः ॥ भूतभव्यो भावितात्मा भूतान्तऽकरणाशिवः ॥ ३ ॥ शरण्यऽकमलानन्दो

नन्दनोनन्दवर्द्धनः॥ वरेण्योवरदोयोगी सुसय्युक्तःप्रकाशकः ॥ ॥४॥ प्राक्प्राणःपरमःप्राणः प्रीतात्माप्रियतःप्रियः ॥ नयःस हस्रपात्साधुर्द्दिव्यकुण्डलमण्डितः ॥ ९ ॥ अव्यङ्गधारीधीरा त्मा प्रचेतावायुवाहनः ॥ समाहितमतिर्द्धाता विधाताकृतमङ्ग लः ॥ ६॥ कपर्दीकल्पकृद्रुद्रःसुमना धर्म्मवत्सलः॥सुमायुक्तावि मुक्तात्मा कृतात्माकृतिनाँवरः ॥ ७ ॥ अविचिन्त्यवपुःश्रेष्ठो म हायोगीमहेश्वरः॥ कान्तःकामादिरादित्यो नियतात्मा निराकु लः ॥ ८ ॥ कामःकारुणिकःकर्त्ता कमलाकरबोधनः ॥ सत्तस त्तिरचिन्त्यात्मा महाकारुणिकोत्तमः ॥ ९ ॥ सञ्जीवनोजीवना थो जगज्जीवोजगत्पतिः ॥ अजयोविश्वनिलयस्सँव्विभागोवृष ध्वजः ॥ १० ॥ वृषाकपिःकल्पकर्त्ता कल्पान्तकरणोरविः ॥ एकचक्ररथोमौनी सुरथोरथिनाँवरः ॥११॥ अक्रोधनोरश्मिमा लीतेजोराशिर्व्विभावसुः॥दिव्यकृद्दिनकृद्देवो देवदेवोदिवस्पतिः ॥ १२ ॥ दीननाथोहविर्होता दिव्यबाहुर्द्दिवाकरः ॥ यज्ञोयज्ञ पतिः पूषास्वर्ण्णरेताःपरावहः ॥ १३ ॥ परापरज्ञस्तरणिरंशु माली मनोहरः ॥ प्राज्ञःप्रजापतिस्सूर्य्यःसविताविष्णुरंशुमान्॥ ॥ १४ ॥ सदागतिर्ग्गन्धबाहुर्व्विहितोविधिराशुगः ॥ पतङ्गःप त गः स्थाणुर्व्विहङ्गोविहगोवरः ॥ १५ ॥ हर्य्यश्वोहरिताश्वश्रह रिदश्वोजगत्प्रियः ॥ त्र्यम्बकस्सर्व्वदमनोभावितात्माभिषग्वरः ॥ १६ ॥ आलोककृल्लोकनाथो लोकालोकनमस्कृतः ॥ का लःकल्पान्तकोवह्निस्तपनस्सम्प्रतापनः ॥१७॥विरोचनो विरू पाक्षस्सहस्राक्षःपुरन्दरः ॥ सहस्ररश्मिर्म्मिहिरो विविधाम्बरभू षणः ॥ १८ ॥ खगःप्रतर्द्दनोधन्यो हयगोवाग्विशारदः ॥ श्री मांश्चशिशिरोवाग्मीश्रीपतिः श्रीनिकेतनः ॥ १९ ॥ श्रीकण्ठः श्रीधरश्श्रीमाञ्छ्रीनिवासोवसुप्रदः ॥ कामचारीमहामायोमहे

शोविदिताशयः ॥ २० ॥ तीर्थक्रियावान्सुनयोविभवोभक्तव त्सलः ॥ कीर्त्तिꣳकीर्त्तिकरोनित्यःकुण्डलीकवचीरथी ॥ २१ ॥ हिरण्यरेताःसप्ताश्वःप्रयतात्मापरन्तपः ॥ बुद्धिमानमरश्रेष्ठोरो चिष्णुꣳपाकशासनः ॥ २२ ॥ समुद्रोधनदोधातामान्धाताकश्म लापहः ॥ तमोघ्नोध्वान्तहावह्निर्होंतान्तꣳकरणोगुहः ॥ २३ ॥ पशुमान्प्रयतानन्दोभूतेशःश्रीमताम्वरः ॥ नित्योदितोनित्यरथः सुरेशः सुरपूजितः ॥ २४ ॥ अजितोविजयोजेताजङ्गमस्स्थाव रात्मकः ॥ जीवानन्दोनित्यगामीविजेताविजयप्रदः ॥ २५ ॥ पर्ज्जन्योग्निस्थितिः स्थेयः स्थविरोऽणुर्बृहन्नः ॥ प्रद्योतनोर थारूढः सर्व्वलोकप्रकाशकः ॥ २६ ॥ ध्रुवोमेधीमहावीर्य्योहंस स्संसारतारकः ॥ सृष्टिकर्त्ताक्रियाहेतुर्म्मार्त्तण्डोमरुताम्पतिः ॥ ॥ २७ ॥ मरुत्वान्दहनस्त्वष्टाभगोभाग्योऽर्य्यमापतिः ॥ वरु णांशोजगन्नाथःकृतकृत्यःसुलोचनः ॥ २८ ॥ विवस्वान्भानुमा न्कार्य्यकारणन्तेजसान्निधिः ॥ असङ्गगामीतिग्मांशुर्द्धर्म्मादि र्द्दीप्तिदीधितिः ॥ २९ ॥ सहस्रदीधितिर्ब्भध्नःसहस्रांशुर्दिवाकरः॥ गभस्तिमान्दीधितिमान्त्सप्तिमानतुलद्युतिः ॥ ३० ॥ भास्कर स्सुरकार्य्यज्ञःसर्व्वज्ञस्तीक्ष्णदीधितिः ॥ सुरज्येष्ठःसुरपतिर्ब्बृ हद्भोवचसाम्पतिः ॥३१॥ तेजोनिधिर्ब्बृहत्तेजाबृहत्कीर्त्तिर्ब्बृहस्प तिः ॥ अहिमान्नूर्ज्जितोधीमानामुक्तꣳकीर्त्तिवर्द्धनः ॥ ३२॥ महा वैद्योगणपतिर्ग्गणेशोगणनायकः ॥ तीव्रप्रतापनस्तापीतापनो विश्वतापनः ॥ ३३ ॥ कार्त्तस्वरोहृषीकेशꣳपद्मानन्दोभिनन्दि तः ॥ पद्मनाभोमृताहारःस्थितिमान्केतुमान्नभः ॥ ३४ ॥ अना द्यन्तोऽच्युतोविश्वोविश्वामित्रोघृणीविराट् ॥ आमुक्तꣳकवची वाग्मीकञ्चुकीविश्वभावनः ॥३५॥ अनिमित्तगतिश्रेष्ठःशरण्यः सर्व्वतोमुखः ॥ विगाहीरेणुरसहस्समायुक्तस्समाहितः ॥३६॥ध

र्म्मकेतुर्द्धर्म्मरतिस्संहर्त्तासय्यँमोयमः ॥ प्रणतार्त्तिहरोवादीसिद्ध काय्यौंजनेश्वरः ॥ ३७ ॥ नभोविगाहनस्सत्यस्तामसः सुमनो हरः ॥ हारीहरिर्हरोवायुर्ऋतु×कालानलद्युतिः ॥ ३८ ॥ सुखसे व्योमहातेजाजगतामन्तकारणम् ॥ महेन्द्रोविष्टुतस्तोत्रंस्तुति हेतुः प्रभाकरः ॥ ३९ ॥ सहस्रकरआयुष्मानरोषःसुखदस्सुखी॥ व्याधिहासुखदः सौख्यङ्कल्याण×कल्पिनाव्वरः ॥४० ॥ आरो ग्यकर्म्मणांसिद्धिर्व्वृद्धिर्ऋद्धिरहस्पतिः ॥ हिरण्यरेताआरोग्यँव्वि द्वान्बन्धुर्व्बुधोमहान् ॥ ४१ ॥ प्रणवान्धृतिमान्धर्म्मोधर्म्मक र्त्तारुचिप्रदः ॥ सर्व्वप्रियस्सर्व्वसहःसर्व्वशत्रुनिवारणः ॥ ४२ ॥ प्रांशुर्व्विद्योतनोद्योतस्सहस्रकिरण×कृतिः ॥ केयूरभूषणोद्भासी भासितोभासनोनलः ॥ ४३ ॥ शरण्यार्त्तिहरोहोताखद्योतःखग सत्तमः ॥ सर्व्वद्योतोभवद्योतः सर्व्वद्युतिकरोमलः ॥ ४४ ॥ क ल्याणः कल्याणकरः कल्प×कल्पकर×कविः॥ कल्याणकृत्कल्प वपुः सर्व्वकल्याणभाजनः ॥ ४५ ॥ शान्तिप्रियःप्रसन्नात्माप्रशा न्त×प्रशमप्रियः॥उदारकर्म्मासुनयःसुवर्च्चोवर्च्चसोज्ज्वलः ॥४६॥ वर्च्चस्वीवर्च्चसामीशस्त्रैलोक्येशोवशानुगः ॥ तेजस्वीसुयशोवर्ण्णि र्व्वर्ण्णाध्यक्षोवलिप्रियः ॥ ४७ ॥ यशस्वीवेदनिलयस्तेजस्वीप्र कृतिस्थितः ॥ आकाशगः शीघ्रगतिराशुगः श्रुतिमान्खगः ॥ ॥ ४८ ॥ गोपतिर्ग्यहदेवेशोगोमानेक×प्रभञ्जनः ॥ जनिताप्र जनञ्जीवोदीपःसर्व्वप्रकाशकः ॥ ४९ ॥ कर्म्मसाक्षीयोगनित्यो नभस्वानसुरान्तकः ॥ रक्षोघ्नोविघ्नशमन×किरीटीसुमनःप्रियः॥ ॥ ५० ॥ मरीचिमालीसुमति×कृताातेथ्योविशेषकः ॥ शिष्टाचा रःशुभाचारः स्वाचाराचारतत्परः ॥ ५१ ॥ मन्दारोमाठरोरेणुः क्षोभण×पाक्षिणाङ्कुरुः ॥ स्वविशिष्टोविशिष्टात्माविधेयोज्ञानशो भनः ॥ ५२ ॥ महाश्वेताप्रियोज्ञेयःसामगोमोददायकः ॥ सर्व्ववे

दप्रगीतात्मासर्व्ववेदालयोलयः ॥ ५३ ॥ वेदमूर्त्तिश्चतुर्व्वेदोवेद भृद्वेदपारगः ॥ क्रियावानतिरोचिष्णुर्व्वरीयांश्चवरप्रदः ॥ ५४ ॥ व्रतचारीव्रतधरोलोकबन्धुरलङ्कृतः ॥ अलङ्कारोक्षरोदिव्यविद्या वान्विदिताशयः ॥ ५५ ॥ अकारोभूषणोभूष्योभूष्णुर्भवनपू जितः ॥ चक्रपाणिर्व्वज्रधरः सुरेशोलोकवत्सलः ॥५६॥ राज्ञीप तिर्म्महाबाहुरप्रकृतिर्व्विकृतिर्गुणः॥ अन्धकारापहः श्रेष्ठोयुगाव र्त्तोयुगादिकृत्॥५७॥अप्रमेयःसदायोगीनिरहङ्कारईश्वरः ॥ शु भप्रदः शुभश्शोभाशुभकर्म्माशुभास्पदः ॥ ५८ ॥ सत्यवान्धृति मानर्क्ष्योह्यकारोवृद्धिदोनलः ॥ बलभृद्बलदोबन्धुर्ब्बलवान्बलि नाम्वरः ॥ ५९ ॥ अनङ्गोनागराडिन्द्रपद्मयोनिर्गणेश्वरः॥सँ व्वत्सरकृतुर्न्नैताकालचक्रप्रवर्त्तकः ॥ ६०॥ पद्मेक्षणपद्मयोनिप द्मप्रभवोनसरद्युतिः ॥ सुमूर्त्तिःसुमतिस्सोमोगोविन्दोजगदादिजः ॥ ६१ ॥ पीतवासापकृष्णवासादिग्वासातीन्द्रियोहरिः ॥ अ तीन्द्रोऽनेकरूपात्मास्कन्दपरपुरञ्जयः ॥ ६२ ॥ शक्तिमाञ्छू लधृग्भास्वान्मोक्षहेतुरयोनिजः ॥ सर्व्वदर्शाजितोदर्शोदुःस्व प्राशुभनाशनः ॥ ६३ ॥ मङ्गल्यकर्त्तातरणिर्व्वैगवान्कश्मलाप हः ॥ स्पष्टाक्षरोमहामन्त्रोविशाखोयजनाप्रियः ॥ ६४ ॥ विश्व कर्म्मामहाशक्तिर्ज्योतिरीशोविहङ्गमः ॥ विचक्षणोदक्षइन्द्रप्रत्यू हप्रियदर्शनः॥६५॥ अश्विनौवेदनिलयोवेदविद्विदिताशयः॥ प्रभाकरोजितारिपुःसुजनोरुणसारथिः॥६६॥ कुबेरसुरथःस्कन्दो महितोभिहितोगुरुः ॥ ग्रहराजोग्रहप्रतिग्रर्ग्रहनक्षत्रमण्डनः॥६७॥ भास्करःसततानन्दोनन्दनोनन्दिवर्द्धनः ॥ मङ्गलोथमङ्गलवा न्माङ्गल्योमङ्गलावहः ॥६८ ॥ मङ्गलाचारचरितःशीर्ण्णःसर्व्वत्र तोव्रती ॥ चतुर्म्मुखपद्ममालीपूतात्माप्रणतार्त्तिहा ॥ ६९ ॥ अ किञ्चनस्सत्यसन्धोनिर्गुणोगुणवान्गुणी ॥ सम्पूर्णपुण्डरीका

क्षोविधेयोयोगतत्परः ॥ ७० ॥ सहस्रांशुरक्रतुपतिःसर्व्वस्वंसुम तिःसुवाक् ॥ सुवाहनोमाल्यदामाधृताहारोहरिप्रियः ॥ ७१ ॥ ब्रह्मप्रचेताप्रथितरप्रतीतात्मास्थिरात्मकः ॥ शतविन्दुःशतमखो गरीयाननलप्रभुः ॥ ७२ ॥ धीरोमहत्तरोधन्यरपुरुषरपुरुषोत्त मः ॥ विद्याधाराधिराजोहिविद्यावान्भूतिदःस्थितः ॥ ७३॥ अ निर्द्देश्यवपुःश्रीमान्विश्वात्माबहुमङ्गलः॥सुस्थितःसुरथःस्वर्ण्णो मोक्षाधारनिकेतनः ॥ ७४ ॥ निर्द्वन्द्वोद्वन्द्वहासग्गःसर्व्वगःसम्प्र काशकः॥दयालुस्सूक्ष्मधीःशान्तिःक्षेमाक्षेमस्थितिप्रियः ॥७५॥ भूधरोभूपतिर्व्वक्तापवित्रात्मात्रिलोचनः।महावराहरप्रियकृद्धाता भोक्ताभयप्रदः ॥७६॥चतुर्व्वेदधरोनित्योविनिद्रोविविधाशनः ॥ चक्रवर्त्तीधृतिकरःसम्पूर्णोऽथमहेश्वरः ॥ ७७ ॥ विचित्ररथएका कीसप्तसप्तिरपरात्परः ॥ सर्व्वोदधिस्थितिकरःस्थितिःस्थेयःस्थि तिप्रियः ॥ ७८ ॥ निष्कलरपुष्कलनिभावसुमान्वासवप्रियः ॥ वसुमान्वासवस्वामीवसुदातावसुप्रदः ॥ ७९ ॥ बलवाञ्ज्ञान वाँस्तत्वमोङ्कारस्त्रिषुसंस्थितः ॥ सङ्कल्पयोनिर्द्दनकृद्भगवान्का रणावहः ॥ ८० ॥ नीलकण्ठोधनाध्यक्षश्चतुर्व्वेदप्रियर्व्वदः ॥वष ट्कारोहुतंहोतास्वाहाकारोहुताहुतिः॥८१॥ जनार्द्दनोजनानन्दो नरोनारायणोम्बुदः ॥ स्वर्ण्णार्ङ्गक्षपणोवायुःसुरासुरनमस्कृतः ॥ ८२ ॥ विग्रहीविमलोविन्दुर्व्विशोकोविमलद्युतिः ॥ द्योतितो द्योतनोविद्वान्विवित्वान्वरदोबली ॥ ८३ ॥ धर्म्मयोनिर्म्महा मोहोविष्णुभ्रातासनातनः ॥ सावित्रीभावितोराजाविसृतोविघृ णीविराट ॥ ८४ ॥ सप्तार्च्चिःसप्ततुरगःसप्तलोकनमस्कृतः ॥ स म्पन्नोऽथजगन्नाथःसुमनाश्शोभनप्रियः ॥ ८५ ॥ सर्वात्मासर्व्व कृत्सृष्टिःसप्तिमान्सप्तमीप्रियः ॥ सुमेधामाधवोमेध्योमेधावीमधु सूदनः ॥ ८६ ॥ अङ्गिरागतिकालज्ञोधूमकेतुस्सुकेतनः ॥ सु

खीसुखप्रदः सौख्यङ्कामीकान्तिप्रियोमुनिः ॥ ८७ ॥ सन्तापनः सन्तपनआतपीतपसाम्पतिः ॥ उग्रश्रवास्सहस्रोस्रःप्रियङ्करी प्रियङ्करः ॥ ८८ ॥ प्रीतोविमन्युरम्भोदोजीवनोजगताम्पतिः ॥ जगत्पिताप्रीतमनाःसर्व्वःसर्व्वोगुहाबलः ॥८९॥ सर्व्वगोजगदानन्दोजगन्नेतासुरारिहा ॥ श्रेयःश्रेयस्करोज्यायानुत्तमोत्तमउत्तमः ॥ ९० ॥ उत्तमोथमहामेरुर्द्धारणोधरणीधरः ॥ धाराधरोधर्म्मराजोधर्म्माधर्म्मप्रवर्त्तकः ॥ ९१ ॥ रथाध्यक्षोरथपतिस्त्वरमाणोमितानलः ॥ उत्तरोनुत्तरस्तापीतारापतिरपाम्पतिः ॥ ॥ ९२ ॥ पुण्यसङ्कीर्त्तनःपुण्योहेतुर्ल्लोकत्रयाश्रयः ॥ स्वर्भानुर्व्विहगारिष्टोविशिष्टोत्कृष्टकर्म्मकृत् ॥ ९३॥ व्याधिप्रणाशनःक्षेमःशूरस्सर्व्वजिताव्वरः ॥ एकनाथोरथाधीशःशनैश्चरपितासितः ॥ ९४ ॥ वैवस्वतगुरुर्म्मृत्युर्द्धर्म्मनित्योमहाव्रतः ॥ प्रलम्बहारःसञ्चारीप्रद्योतोद्योतितोनलः ॥ ९५ ॥ सन्तानकृत्परोमन्त्रोमन्त्रमूर्त्तिर्म्महाबलः ॥ श्रेष्ठात्मासुप्रियःशम्भुर्म्महतामीश्वरेश्वरः ॥ ९६ ॥ संसारगतिविक्षेतासंसाराण्र्णवतारकः ॥ सप्तजिह्वःसहस्रार्च्चीरत्नगर्भोपराजितः ॥ ९७ ॥ धर्म्मकेतुरमेयात्माधर्म्माधर्म्मवरप्रदः ॥ लोकसाक्षीलोकगुरुर्ल्लोकेशश्छन्दवाहनः ॥ ९८॥ धर्म्मरूपःसूक्ष्मवायुर्द्धनुष्पाणिर्द्धनुर्द्धरः ॥ पिनाकधृङ्महोत्साहोनैकमायोमहाशनः ॥ ९९ ॥ वीरःशक्तिमतांश्रेष्ठःसर्व्वशस्त्रभृताव्वरः॥ ज्ञानगम्योदुराराध्योलोहिताङ्गोरिमर्द्दनः॥१००॥ अनन्तोधर्म्मदोनित्योधर्म्मकृच्चक्रिविक्रमः ॥ दैवतरुयक्षरोमद्यो नीलाङ्गोनोललोहितः ॥ १०१ ॥ एकोनैकस्त्रयीव्यासःसविता सम्मितिञ्जयः॥ शार्ङ्गधन्वानलोभीमःसर्व्वप्रहरणायुधः ॥१०२॥ परमेष्ठीपरज्योतिर्न्नाकपालीदिवस्पतिः ॥ वदान्योवासुकिर्व्वैद्य आत्रेयोतिपराक्रमः ॥ १०३ ॥ द्वापरःपरमोदारःपरमब्रह्मच

र्य्यवान्॥ उद्दीप्तवेषोमुकुटीपद्महस्तोहिमांशुभृत् ॥ १०४ ॥ स्मितःप्रसन्नवदनःपद्मोदरनिभाननः ॥ सायन्दिवादिव्यवपुर निर्देश्योमहारथः ॥ १०५ ॥ महारथोमहानीशःशेषःसत्त्वरज स्तमः ॥ धृतातपत्रप्रतिमोविमर्षीनिर्ण्णयःस्थितः ॥ १०६ ॥ अहिंसकःशुद्धमतिरद्वितीयोऽरिमर्द्दनः ॥ सर्व्वदोधनदोमोक्षोवि हारीबहुदायकः ॥१०७॥ ग्रहनाथोग्रहपतिर्ग्रहेशस्तिमिरापहः॥ मनोहरवपुःशुभ्रःशोभनःसुप्रभाननः ॥ १०८ ॥ सुप्रभःसुप्र भाकारःसुनेत्रोनिक्षुभापतिः ॥ राज्ञीप्रियःशब्दकरोग्रहेशस्ति मिरापहः ॥ १०९ ॥ सिंहिकेयरिपुर्दैवोवरदोवरनायकः ॥ चतु र्ब्भुजोमहायोगीयोगीश्वरपतिस्तथा ॥ ११० ॥ अनादिरूपो दितिजोरत्नकान्तिःप्रभामयः ॥ जगत्प्रदीपोविस्तीर्णोमहावि स्तीर्णमण्डलः ॥ १११ ॥ एकचक्ररथः स्वर्ण्णरथःस्वर्ण्णशरी रधृक् ॥ निरालम्बोगगनगोधर्म्मकर्म्मप्रभावकृत् ॥ ११२ ॥ ध र्म्मात्माकर्म्मणांसाक्षीप्रत्यक्षःपरमेश्वरः ॥मेरुसेवीसुमेधावीमेरुर क्षाकरोमहान्॥११३॥आधारभूतोरतिमांस्तथाचधनधान्यकृत्। पापसन्तापसंहर्त्तामनोवाञ्छितदायकः ॥ ११४ ॥ रोगहर्त्तारा ज्यदायीरमणीयगुणोनृणी ॥ कालत्रयानन्तरूपोमुनिवृन्दन मस्कृतः ॥११५॥ सन्ध्यारागकरःसिद्धःसन्ध्यावन्दनवन्दितः॥ साम्राज्यदाननिरतःसमाराधनतोषवान् ॥ ११६ ॥ भक्तदुःख क्षयकरोभवसागरतारकः ॥ भयापहर्त्ताभगवानप्रमेयपराक्रमः॥ मनुस्वामीमनुपतिर्म्मान्योमन्वन्तराधिपः ॥ ११७ ॥ एतत्तेस र्व्वमाख्यातंयन्मान्त्वम्परिपृच्छसि॥ नाम्नांसहस्रंसवितुःपाराश र्य्योयदाहमे ॥ ११८ ॥ धन्यंयशस्यमायुष्यन्दुष्टदुःस्वप्ननाश नम् ॥ बन्धमोक्षकरञ्चैवभानोर्न्नामानुकीर्त्तनम् ॥ ११९ ॥ य स्त्विदंशृणुयान्नित्यम्पठित्वाप्रयतोनरः ॥ अक्षयंसुखमन्नाद्यम्भवे

त्तस्योपसाधितम् ॥ १२० ॥ नृपाग्नितस्करभयव्याधिभ्योनभ यम्भवेत् ॥ विजयीचभवेन्नित्यंश्रेयश्चपरमाप्नुयात् ॥ १२१ ॥ कीर्तिमान्सुभगोविद्वान्ससुखीप्रियदर्शनः ॥ भवेद्वर्षशतायुश्च सर्व्वव्याधिविवर्जितः ॥१२२॥ नाम्नांसहस्रमिदमंशुमत ५ पठेद्य ५ प्रातः शुचिर्न्नियमवान्सुसमाधियुक्तः ॥ द्वारेणतम्परिहरन्तिसदै वरोगाभीतास्सुपर्ण्णमिवसर्व्वमहोरगेन्द्राः ॥१२३॥ इतिश्रीभवि ष्यपुराणेसप्तमीकल्पेभगवतःश्रीसूर्य्यस्यनाम्नांसहस्रंसम्पूर्णम् ॥

## इतिसूर्य्यतन्त्रं समाप्तम् ।

